ॐ श्रीरघुनाथजी सहाय ॥ ॐ सरस्वतीप्रकाशनमस्मै ॥ ✱ ॥

ॐस्वस्तिश्रीगणेशायनमः ॐगुरवेनमः ॐपरमगुरवेनमः ॥ ॐनत्वासरस्वतींदेवीं।शुद्धांगुण्यांकरोम्यहं ॥पाणिनीयप्रवे।
शायलघुसिद्धान्तकौमुदीम् ॥१॥ अइउण् ऋऌक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश्
खफछठथचटतव् कपय् शषसर् हल् १४ इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि एषामन्त्याइतः हकारादिष्वका
रउच्चारणार्थः लण्मध्येत्वित्संज्ञकः। हलन्त्यं उपदेशेन्त्यंहलित्स्यात् उपदेश आद्योच्चारणं सूत्रेष्वदृष्टंपदं सूत्रान्तरादनु।
वर्त्तनीयंसर्वत्र अदर्शनंलोपः प्रसक्तस्यादर्शनंलोपसंज्ञंस्यात् तस्यलोपः तस्येतोलोपःस्यात् णादयोणाद्यर्थाः आदि
रंत्येनसहेता अन्त्येनेतासहित आदिर्मध्यगानांस्वस्यचसंज्ञास्यात् यथाणिति अइउवर्णानांसंज्ञा एवमच्हल्अल्इत्या
दयः ऊकालोज्झ्रस्वदीर्घप्लुतः उश्चऊश्चऊ३श्चवः वांकालइवकालोयस्यसोच्क्रमाद्ह्रस्वदीर्घप्लुतसंज्ञःस्यात् सचप्रत्ये
कमुदात्तादिभेदेनत्रिधा उच्चैरुदात्तः ताल्वादिषुसभागेषुस्थानेषुऊर्ध्वभागेनिष्पन्नोजुदात्तसंज्ञास्यात् नीचैरनुदात्तः
ताल्वादिसभागेषुस्थानेष्वधोभागे निष्पन्नोजनुदात्तसंज्ञास्यात् समाहारःस्वरितः उदात्तानुदात्तत्ववर्णधर्मौसमाह्रिय
तेयस्मिन्सोच्स्वरितसंज्ञास्यात् सनवविधोपिप्रत्येकमनुनासिकाननुनासिकत्वाभ्यांद्विधा मुखनासिकावचनोनुनासि
कः मुखसहितनासिकयोच्चार्यमाणोवर्णोनुनासिकसंज्ञःस्यात् तदित्थं अइउऋएषांप्रत्येकमष्टादशभेदाः लृवर्णस्य
द्वादशतस्यदीर्घाभावात् एचामपिद्वादशतेषांह्रस्वाभावात् तुल्यास्यप्रयत्नंसवर्णं ताल्वादिस्थानमाभ्यंतरप्रयत्नश्च
त्येतद्द्वयंयस्य येनतुल्यंतन्मिथःसवर्णसंज्ञंस्यात् ऋलृवर्णयोर्मिथःसावर्ण्यंवाच्यं अकुहविसर्जनीयानांकंठः
इचुयशानांतालु ऋटुरषाणांमूर्द्धा लृतुलसानांदंताः उपूपध्मानीयानामोष्ठौ ञमङणनानांनासिकाच एदैतोः
कंठतालु ओदौतोःकंठोष्ठं वकारस्यदंतोष्ठं जिह्वामूलंनासिकानुस्वारस्य अष्टौस्थानानिवर्णानामुरःकंठःशिरस्त
थाजिह्वामूलंचदन्ताश्चनासिकोष्ठौचतालुच हकारंपंचमैर्युक्तमन्तस्थाभिश्चसंयुतं उरस्यंतंविजानीयात् कंठ्यमा
हुरसंयुतं प्रयत्नोद्विधा आभ्यंतरोबाह्यश्च आद्यःपंचधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् तत्रस्पृष्टंप्रयत्नंस्प
र्शानां ईषत्स्पृष्टमन्तस्थानां ईषद्विवृतमूष्मणांविवृतंस्वराणांह्रस्वस्यावर्णस्यप्रयोगेसंवृतं प्रक्रियादशायांतुविवृत।
मेवबाह्यप्रयत्नस्त्वेकादशधा विवारः संवारः श्वासोनादोघोषोऽघोषोऽल्पप्राणोमहाप्राणउदात्तोनुदात्तःस्वरितश्चेति

जिह्वामूलीयस्य

ऌकारोऽपि

खरो विवारः श्वासोऽघोषाश्च॥ हशः संवारो नादो घोषाश्च॥ वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः॥ वर्गाणां द्वितीयचतुर्थौ श
लश्च महाप्राणाः॥ कादयो मावसानाः स्पर्शाः॥ यणोऽन्तस्थाः॥ शल ऊष्माणः॥ अचः स्वराः॥ ≍क ≍ख इति कखाभ्यां प्रागर्द्धविसर्गसदृ
शो जिह्वामूलीयः॥ ≍प ≍फ इति पफाभ्यां प्रागर्द्धविसर्गसदृशो उपध्मानीयः॥ अं अः इत्यचः परावनुस्वारविसर्गौ॥ अणुदित्सवर्णस्य
चाप्रत्ययः॥ १।१।६९॥ प्रतीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यात्॥ अत्रैवाण् परेण णकारेण बोध्यः॥ कु चु टु तु पु एते॥
उदितः॥ अदेवमष्टादशानां संज्ञा स्यात्॥ तथेकारोकारौ ऋकारस्त्रिंशतः संज्ञा॥ एवं अनुनासिकाननुनासिभेदेन यवला द्विधा
तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा॥ परः सन्निकर्षः संहिता॥ १।४।१०९॥ वर्णानामतिशयितः सन्निधिः संहितासंज्ञा
स्यात्॥ हलोऽनन्तराः संयोगः॥ १।१।७॥ अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः॥ सुप्तिङन्तं पदम्॥ १।४।१४॥ सुबन्तं तिङन्तं
च पदसंज्ञं स्यात्॥ इति संज्ञाप्रकरणम्॥ इको यणचि॥ ६।१।७७॥ इकः स्थाने यण् स्यादचि संहितायां विषये॥ सुधी उपास्य इ
ति स्थिते॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ १।१।६६॥ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्य
॥ स्थानेऽन्तरतमः॥ १।१।५०॥ प्रसङ्गे सति सदृशतम आदेशः स्यात्॥ सुध्य् य् उपास्य इति स्थिते॥ अनचि च॥ ८।४।४७॥ अचः परस्य
यरो द्वे वा स्तो न त्वचि॥ झलां जश् झशि इति पूर्वधकारस्य दकारः॥ संयोगान्तस्य लोपः॥ ८।२।२३॥ संयोगान्तं यत्पदं तस्य लो
पः स्यात्॥ अलोऽन्त्यस्य॥ १।१।५२॥ षष्ठीनिर्दिष्टोऽन्त्यस्यादेशः स्यात्॥ इति यलोपे प्राप्ते॥ यणः प्रतिषेधो वाच्यः॥ अज्झीनं परेण
संयोज्यम्। सुद्ध्युपास्यः। मद्ध्वरिः। धात्त्रंशः। लाकृतिः। अचो रहाभ्यां द्वे॥ ८।४।४६॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा
स्तः॥ हर्य्यनुभवः। न सन्ति। एचोऽयवायावः॥ ६।१।७८॥ एचः क्रमात् अय् अव् आय् आव् एते स्युरचि॥ यथासंख्यमनुदेशः समा मा:
नाम्॥ १।३।१०॥ समसम्बन्धी विधिर्यथासंख्यं स्यात्॥ हरये विष्णवे नायकः पावकः॥ वान्तो यि प्रत्यये॥ ६।१।७९॥ यकारादौ प्रत्य
ये परे ओदौतोरवावौ स्तः॥ गव्यम् नाव्यम्॥ क्षय्यजय्यौ शक्यार्थे॥ ६।१।८१॥ यान्तादेशनिपातनार्थमिदं। क्षय्यं जय्यं। शक्यार्थे किं
क्षेयं जेयं तेयं पापं नेयं मनः॥ अध्वपरिमाणे च॥ गोशब्दात् यूतिशब्दे परे अध्वपरिमाणे वाच्ये अवादेशः स्यात्। गव्यूतिः॥ गोर्यूतौ
छन्दस्युपसंख्यानम्॥ क्रोशयुगं॥ अदेङ् गुणः॥ अदेङ् च गुणसंज्ञा स्यात्॥ तपरस्तत्कालस्य॥ १।१।७०॥ तपरस्तात्परो वा उच्चार्यमाणव
र्णः समकालस्यैव संज्ञा स्यात्॥ एकः पूर्वपरयोः॥ ६।१।८४॥ इत्यधिकृत्य॥ आद्गुणः॥ ६।१।८७॥ अवर्णादचि परे पूर्वपरयोरेको

गव्यूतिरिति

व

शस्यादेशः स्यात् संहितायां विषये। उपेंद्रः। गंगोदकं। रमेशः। उपदेशेऽनुनासिक इत्॥२१॥ उपदेशेऽनुनासिकोऽजित्संज्ञः स्या
त्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥ उरण्रपरः॥१।१।५१॥ ऋ इति त्रिंशतः
संज्ञेत्युक्तं तस्मिन् नेयो ण्यासरपरः सन्नेव प्रवर्तते॥ कृष्णर्द्धिः। तवल्कारः। नवल्कारः॥ लोपः शाकल्यस्य॥८।३।१९॥ स्यपादसमाप्त्या
र्थीमति त्रिपाद्यासिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्॥ हर इह॥ हरयिह॥ विष्ण इह विष्णविह॥ वृद्धिरादैच्॥१।
१।१॥ आदैच्च वृद्धिसंज्ञः स्यात्॥ वृद्धिरेचि॥६।१।८८॥ आदेचि वृद्धिरेकादेशः स्यात्॥ गुणापवादः॥ कृष्णैकत्वं। गंगौघः। दे
१७ वैश्वर्यं। कृष्णौत्कण्ठ्यम्॥ एत्येधत्यूठ्सु॥६।१।८९॥ अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् पररू
पगुणापवादः॥ उपैति। उपैधते॥ प्रष्ठौहः। एजाद्योः किं उपेतः॥ माभवान्प्रेदिधत्। अक्षादूहिन्यामुपसंख्यानं। अक्षौहिणी।
सेना। स्वादीरेरिणोः॥ स्वैरः स्वैरी स्वैरिणी॥ प्राद्ढोढोढ्येषैष्येषु। प्रौहः। प्रौढः। प्रौढिः। प्रैषः। प्रैष्यः। ऋते च तृतीयासमासे। अव
र्णात् ऋते परे वृद्धिरेकादेशः स्यात्। सुखेन ऋतः सुखार्तः। तृतीयेति किं परमर्तः। प्रवत्सतरकम्बलवसन २
ऋणदशानामृणे। प्रार्णं वत्सतरार्णं कम्बलार्णं वसनार्णं दशार्णं॥ उपसर्गाः क्रियायोगे। प्रादयः क्रियायोगे उपसर्गसंज्ञाः
स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप॥ एते प्रादयः। भूवा
दयो धातवः॥१।३।१॥ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः॥ उपसर्गादृति धातौ॥ अवर्णान्तादुपसर्गादृकारादौ धातौ परे
वृद्धिरेकादेशः स्यात्। प्रार्च्छति उपार्च्छति। एङि पररूपं॥६।१।९४॥ आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् प्रेजते उपो
षति। अचोऽन्त्यादि टि॥१।१।६४॥ अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम्। तच्च टेः। शकन्धुः कर्कन्धुः म
नीषा पतञ्जलिः सीमन्तः केशवेशे सीमान्तोऽन्यः सारङ्गः पशुपक्षिणोः सारङ्गोऽन्यः। आकृतिगणोऽयं। एवे चानियोगे। अवर्णादेव
शब्दे परे पररूपमेकादेशः स्यात् अनियोगे। वाक्येऽवधारणे त्वस्ये अनियोगे किं तवैव। ओत्वोष्ठयोः समासे वा। स्थूलोतुः स्थूलौतुः। बिम्बोष्ठः
बिम्बौष्ठः। समासे किं तवौष्ठः। ओमाङोश्च। अवर्णान्तादोमि आङि च परे पररूपमेकादेशः स्यात्। शिवायों नमः शिव एहि शिवेहि। अकः सवर्णे दीर्घः।
अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः श्रीशः विष्णूदयः होतृकारः। एङः पदान्तादति॥ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् हरेऽव विष्णो
ऽव। सर्वत्र विभाषा गोः॥ लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः पदान्ते। गोअग्रं गोऽग्रं एङन्तस्य किं चित्रग्वग्रं पदान्ते किं गोः। अनेकाल्शित्सर्वस्य। अनेकाल्
देशः शिच्च सर्वस्य स्यात्। अतिमात्रे। निर्दिश्यमानस्यादेशा भवन्ति। पूर्वे तस्यैव स्यात्। अवङ्स्फोटायनस्य॥

दा

ॐ

ॐ॰ पदांतेएङः तस्य गोरवङ् वा चिगवाग्रं गोऽग्रं गोग्रं पदांतेनेति किं गवि इङवङ्गोरवङ् इङ्गवेन्द्र ; यवास्थिन विभाषया ।
ल॰को गवाक्षः हृएह्रुतेच ह्र अंतस्योपनेय हाका नसंदेः स्तुतो वास्तुनप्रगृह्यः ऽविनिते । एने विप्रकृत्यास्तु आगच्छ कृष्ण
अत्रोस्वरांति ह्रस्वेलञ्चास्येयोगगृह्य दीर्घेच शेषे २ (नेनः ३ नेतस्याप्येकेकस्यप्रावाह्लास्रेवोपनेयहाकांतस्य सूरद भिन्नं
२ स्यापिगुरोः स्तुतो वास्यात् देवदत्त३ देवदत्त देवदत्ता गुरो किं वकारादकारस्य माभूत् अन्त्यनः किंकृत्स्न एकैकग्रहणाय यथार्थं
इह देहि वचनमग्गृह्य ईहूदंते द्विवचनं प्रगृह्यसंस्यात् हरी एतो विष्णू इमौ गंगे अमू अदसो मात् अस्मात् परावीदूतौ प्रगृह्य
संज्ञौ स्तः अमी ईशाः रामकृष्णावमू आसाते मातृकिं अमुनिमात् ग्रहणे प्रकारोऽप्यनुवर्तते न अमुकेच चादयोऽसत्त्वे लिंग
संख्यान्वितं द्रव्यं अद्रव्यार्था चादयो निपातसंज्ञास्युः प्रादयः एते एपिनपातानिपातसंज्ञास्युः निपातएकाजनाङ् ॥ एको
च निपात आङ्॰ वर्ज्यः प्रगृह्यसंज्ञः स्यात् इइन्द्रः उउमेशः अअनन्तः अनाङि त्युक्ते ईदाकारः प्रगृह्यसंज्ञ एव ईषद
र्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोरङितं आ एवं मन्यसे आ एवं किल तत् ईषदुष्ण
म् ओष्णं ओत् ओदंतो निपातः प्रगृह्यः अहो ईशाः संबुद्धौ शाकल्यस्येतावनार्षे संबुद्धिनिमित्तकओकारो वा प्रगृह्यो ।
भवेदितिके इति परे अनार्षे विष्णो इति विष्णविति विष्ण इति अनार्षे किं ब्रह्मबंधुरित्यब्रवीत् मयउञोवो वा मयः परस्य उञो वो वा स्यात् अ
७ चिकिम्वुक्तं किमुक्तं वत स्याऽसिद्धत्वात् नेतुस्वारः इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च पदान्ता इको ह्रस्वो वा सवर्णे चि
कृत विधिसामर्थ्यान्नस्वरसंधिः चक्रि अत्र च अत्र पदान्ता किं गौर्यौ नसमासे वाप्यस्य अन्वकः ऋति परे पदान्ता ऽकः प्रा
ग्वत् वा ब्रह्मऋषिः ब्रह्मर्षिः पदान्ता किं आर्छत् इत्यच्संधिः २ ॥ ॐ ॥ स्तोश्चुनाश्चुः २ स्तोः सकारतवर्गयोः शकारचवर्गा
भ्यां योगे शकारचवर्गौ स्तः रामश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जयः शात् शात्परस्य तवर्गस्य श्चुत्वं न स्यात् विश्नः प्रश्नः
ष्टुनाष्टुः स्तोः ष्टुना योगे ष्टुः स्यात् रामष्षष्ठः रामष्टीकते पेष्टा तट्टीकते चक्रिण्ढौकसे न पदान्ताट्टोरनाम् पदान्ताट्टवर्गा
त्परस्यानाम स्तोः ष्टुर्न स्यात् षट्सन्तः षट्ते पदान्तात् किं ईट्टे टोः किं सर्पिष्टमम् अनाम् नवतिनगरीणामिति वाच्यम् षण्णां ष
ण्णवतिः षण्णगर्यः तोःषि नत्वे तस्य षकारे परे ष्टुत्वं न स्यात् सन्षष्ठः झलां जशोऽन्ते पदान्ते झलां जशः स्युः वागीशः चिद्रूपं
पदोन्तु नासिकेनुनासिको वा पदान्तस्य यरोऽनुनासिके परे नुनासिको वा स्यात् एतन्मुरारिः एतद्मुरारिः प्रत्यये भाषायां नित्यं

तन् मात्रं चिन्मात्रम् तोर्लि तवर्गस्य लकारे परे परसवर्णः तल्लयः विद्वाँल्लिखति तस्यानुनासिको लः। उदः स्थास्तंभोः पूर्व।
स्य उदः परयोः स्थास्तंभोः पूर्वसवर्णः तस्मादित्युत्तरस्य पंचमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य
ज्ञेयम् आदेः परस्य परस्य यद्विहितं तत् तस्मादेर्बोध्यं अघोषस्य महाप्राणस्य विवारस्य श्वासस्य सस्य स्थाने तादृश एव थकारः
इति सस्य थः झरो झरि सवर्णे हलः परस्य झरो वा लोपः सवर्णे झरि इति पदेऽथ लोपः लोपाभावपक्षे तथस्यैव श्रवणं
न तु खरि चेति चर्त्वं चर्त्वं प्रति थस्यासिद्धत्वात् खरि च खरि परे झलां चरः स्युः इत्युदस्य तः उत्थानं उत्तंभनं कपो हाभ्यां।
तरस्यां कपः परस्य हस्य वा पूर्वसवर्णः सं वारस्य नादस्य घोषस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थः वाग्घरिः वाग्
हरिः षट्छोटि पदान्तात् कयः परस्य शस्य छो वा टि तच्छ्लोकेन तच्श्लोकेन अम्परे किं वाक् श्चोतति मोनुस्वारः मान्तस्य प
दस्यानुस्वारो हलि हरिं वंदे पदस्येति किं गम्यते नश्चापदान्तस्य झलि नस्य मस्य चापदान्तस्यानुस्वारो झलि यशांसि आ
क्रंस्यते झलि किं मन्यते अनुस्वारस्य ययि परसवर्णः अंचितः शान्तः कुण्ठितः वा पदान्तस्य पदान्तस्यानुस्वारस्य य
यि परे परसवर्णो वा स्यात् त्वं करोषि त्वङ्करोषि संयन्ता सय्यँन्ता संवत्सरः सव्ँवत्सरः यँल्लोकम् यल्लोकम् अत्रानुस्वारस्य
पक्षे अनुनासिका यवलाः मो राजि समः क्वौ किं वंते राज धातौ परे समो मस्य म एव सम्राट् हेमपरे वा मपरे हकारे परे मस्य
मो वा स्यात् किं ह्मलयति किं ह्मलयति यवलपरे यवला वा यवले हकारे मस्य यवला वा स्युः किय्ँह्यः किं ह्यः किं व
ल्यति किं ह्वलयति किं ल्ह्लादयति किं ह्लादयति नपरे नः नपरे हकारे परे मस्य नः स्याद्वा किन् ह्नुते किं ह्नुते आद्यन्तौ।
टकितौ टकितो यस्य सोऽन्तस्य क्रमादाद्यन्तावयवौ स्तः ङः सि धुट् ङान्तस्य सस्य धुट् वा षट्सन्तः षट्त्सन्तः ङ्णोः कुक्
टुक् शरि ङकारणकारयोः कुक्टुकौ वा स्तः शरि प्राङ् षष्ठः प्राङ्क्षष्ठः सुगण् षष्ठः सुगण्ट्षष्ठः सुगण् षष्ठः नश्च नकारान्ता।
त्परस्य सस्य धुट् वा सन्त्सः सन्सः शि तुक् पदान्तस्य नस्य शे तुग्वा सञ्च्छंभुः सञ्शंभुः शञ्छंभुः ङमो ह्रस्वादचि ङमुण्नि।
त्यं ह्रस्वात्परो यो ङम् तदंतं पदं तस्मात्परस्याचो ङमुडागमः स्यान्नित्यं प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः ॥
समः सुटि समो रुः स्यात् सुटि अत्रानुनासिकः पूर्वस्य तु वा ॥ अत्ररुप्रकरणे रोः पूर्वस्यानुनासिको वा ॥ ॐ

अनुनासिकात्परोनुस्वारः अनुनासिकं विहाय रोः पूर्वस्मात्परोनुस्वारागमः खरवसानयोर्विसर्जनीयः खरि अवसाने च पदा
न्तस्य रस्य विसर्गः सँस्कर्ता संस्कर्ता पुमः खय्यम्परे अम्परे खयि पुमो रुः पुंस्कोकिलः
पुंस्कोकिलः नश्छव्यप्रशान् अम्परे छवि नान्तस्य पदस्य रुः विसर्जनीयस्य सः खरि चक्रिंस्त्रायस्व चक्रिंस्त्रायस्व अप्रशान् कुं
प्रशान्तनोति पदान्तस्येति किं हन्ति नॄन्पे नॄनित्यस्य रुः स्याद्वा पे परे कुप्वोः ≍क≍पौ च कवर्गपवर्गयोः परे विसर्गस्य ≍क
≍पौ स्तः चाद्विसर्गः नॄ≍पाहि नॄँ≍पाहि नॄंःपाहि नॄँःपाहि सोऽपदादौ विसर्गस्य सः स्यादपदाद्योः कुप्वोः पय
स्पाशम् यशस्कल्पम् यशस्कम् यशस्काम्यति अनव्ययस्येति वाच्यम् प्रातःकल्पम् काम्ये रोरेवेति वाच्यं नेह गीःकाम्य
ति इणः षः इणः परस्य विसर्गस्य षः कुप्वोः सर्पिष्पाशं सर्पिष्कल्पं सर्पिष्कम् सर्पिष्काम्यति कस्कादिषु च एष्विण उत्तरस्य विस
र्गस्य षः स्यादन्यस्य तु सः कस्कः कौतस्कुतः सर्पिष्कुण्डिका धनुष्कपालम् इत्यादि आकृतिगणोयं तस्य परमाम्रेडितं
द्विरुक्तस्य परमाम्रेडितं स्यात् कानाम्रेडिते कान्नकारस्य रुः आम्रेडिते कांस्कान् कांस्कान् छे च ह्रस्वस्य छे तुक् शिवच्छाया
पदान्ताद्वा दीर्घात्पदान्ताच्छे तुग्वा लक्ष्मीच्छाया लक्ष्मीछाया इति हल्संधिः विसर्जनीयस्य सः खरि विष्णुस्त्राता वा शरि
शरि विसर्गस्य विसर्गो वा हरिश्शेते हरिःशेते इति विसर्गसंधिः स्वौजसमौडिति सुप्रत्यये कृते शिवस् अर्च्य इति स्थि
ते ससजुषो रुः पदान्तस्य सस्य सजुषश्च रुः स्यात् अतो रोरप्लुतादप्लुते अप्लुतादतः परस्य रोरुः स्यादप्लुतेति
शिवोर्च्यः हशि च तथा शिवो वन्द्यः भोभगोअघोअपूर्वस्य योशि एतत्पूर्वस्य रोर्यादेशोशि देवाइह देवायिह
भोस् भगोस् अघोस् एते सान्ता निपाताः तेषां रुत्वे यत्वे च कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदान्तयोर्वकारयका
रयोर्लघूच्चारणौ वयौ वा स्तोशि परे यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं स लघूच्चारणः ओतो गार्ग्यस्य
पदान्तस्य लघुप्रयत्नस्य यस्य नित्यं लोपः भोस् अच्युत भो अच्युत लघुप्रयत्नपक्षे भोयच्युत हलि सर्वेषां भोभगोअघो
अपूर्वस्य यस्य लोपः स्याद्धलि सर्वेषां मते भो देवाः भगो नमस्ते अघो याहि देवा यान्ति रोऽसुपि अह्नो रेफादेशो न तु सुपि
अहरहः अहर्गणः असुपि किं अहोभ्यां रोरि रेफस्य रेफे परे लोपः ढ्रलोपे पूर्वस्य दीर्घोणः ढरेफयोर्लोपनिमित्तयोः ॥

पूर्वस्याणो दीर्घः । पुना रमते हरी रम्यः शम्भू राजते अणः किं तृढः मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्रा
प्ते विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं कार्यं स्यात् इति रोरीति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमे
व मनोरथः एतत्तदोः सुलोपोऽकोरनञ्समासे हलि अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे एष विष्णुः
स शम्भुः अकोः किं एषको रुद्रः अनञ्समासे किं असः शिवः हलि किं एषोऽत्र सोऽचि लोपे चेत्पादपूरणं सऽचि सस्य लोपः
स्यात् पादश्चेल्लोपे सत्येव पूर्येत सेमामविड्ढि प्रभृतिं सैष दाशरथी रामः इति विसर्गसन्धिः अर्थवदधातुरप्रत्ययः ॥ ॥ ६ ॥
प्रातिपदिकं धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ
समासाश्च तथा स्युः स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् सु औ जस् इति
प्रथमा अम् औट् शस् द्वितीया टा भ्याम् भिस् तृतीया ङे भ्याम् भ्यस् चतुर्थी ङसि भ्याम् भ्यस् पञ्चमी ङस् ओस्
आम् षष्ठी ङि ओस् सुप् सप्तमी ङ्याप्प्रातिपदिकात् ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः सुपः
सुपस्त्रीणि त्रीणि वचनान्येकैकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने द्वित्वैकत्वयो
रेते स्तः विरामोऽवसानम् वर्णानामभावोऽवसानसंज्ञः स्यात् रुत्वविसर्गौ रामः सरूपाणामेकशेष एकविभक्तौ एक
विभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते प्रथमयोः पूर्वसवर्णः अकः प्रथमाद्वितीययोरचि परे पूर्व
सवर्णदीर्घ एकादेशः इति प्राप्ते नादिचि आवर्णादिचि परे न पूर्वसवर्णदीर्घः वृद्धिरेचि रामौ बहुषु बहुवचनम् बहु
त्वे एतत्स्यात् चुटू प्रत्ययाद्यौ चुटू इतौ स्तः विभक्तिश्च सुप्तिङौ विभक्तिसंज्ञौ स्तः न विभक्तौ तुस्माः विभक्तिस्थास्तवर्ग
सभा इतो न इति सस्य नेत्त्वम् रामाः एकवचनं संबुद्धिः संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् यस्मात्प्र
त्ययविधिस्तदादि प्रत्ययेऽङ्गम् यः प्रत्ययो यस्मात्क्रियते तदादिशब्दरूपं तस्मिन्प्रत्यये अङ्गसंज्ञं स्यात् ॥
एङ्ह्रस्वात्संबुद्धेः एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते संबुद्धेश्चेत् संबोधने तेनान्वयार्थे हेशब्दः प्राक्प्रयुज्यते

ल॰ कौ॰ प ८

हे राम हे रामौ हे रामाः अमि पूर्वः अकोऽमि पूर्वरूपमेकादेशः स्यात् रामम् रामौ लशक्वतद्धिते तद्धितवर्जप्रत्ययाद्या ल
शकवर्गा इतः स्युः तस्मात् शसो नः पुंसि पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात् पुंसि अट्कुप्वाङ्नुम्व्यवायेऽपि ।
अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे इति शा
मे न पदांतस्य पदांतस्य नस्य णो न स्यात् रामान् टाङसिङसामिनात्स्याः अदन्तात् टादीनाम् इनादयः स्युः णत्वम् रामेण
सुपि च यञादौ सुप्यतोऽङ्गस्य दीर्घः स्यात् रामाभ्याम् अतो भिस ऐस् अतोंगात् भिस ऐस् स्यात् अनेकाल्शित्सर्वस्य र
रामैः ङेर्यः अतोंगात्परस्य ङेर्यादेशः स्यात् वर्णादेशो न स्थानिवत् आदेशः स्थानिवत् स्यात् न तु स्थानालाश्रयविधौ इति
स्थानिवत्त्वात् सुपि चेति दीर्घः रामाय रामाभ्यां बहुवचने झल्येत् झलादौ बहुवचने सुप्यतोंगस्यैकारः रामेभ्यः सुपि किम्
पचध्वम् वावसाने अवसाने झलां चरो वा स्यात् रामात् रामाद् रामाभ्याम् रामेभ्यः रामस्य ओसि च अतोंगस्यैकारः स्यात्
रामयोः ह्रस्वनद्यापो नुट् ह्रस्वान्तान्नद्यंतादाबन्ताच्चांगात्परस्यामो नुडागमः स्यात् नामि अजंतांगस्य दीर्घो नामि रामाणा
म् रामे रामयोः एत्वे कृते आदेशप्रत्ययोः इण्कुभ्यां परस्यापदान्तस्यादेशस्य प्रत्ययावयवस्य च सकारस्य मूर्धन्यादे
शः स्यात् ईषद्विवृतस्य सस्य तादृश एव षः रामेषु एवं कृष्णादयोऽदन्ताः सर्वादीनि सर्वनामानि सर्व विश्व उभ उभय डतर डत
म अन्य अन्यतर इतर त्वत् त्व नेम सम सिम पूर्व पर अवर दक्षिण उत्तर अपर अधराणि व्यवस्थायामसंज्ञायाम् स्वमज्ञातिधनाख्या
यां अन्तरं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् सर्वः सर्वौ जसः शी अ
देन्तात्सर्वनाम्नो जसः शी स्यात् अनेकाल्त्वात्सर्वादेशः सर्वे सर्वनाम्नः स्मै अतः सर्व नाम्नो ङेः स्मै स्यात् सर्वस्मै ङसि ।
ङ्योः स्मात्स्मिनौ अतः सर्वनाम्न एतयोरेतौ स्तः सर्वस्मात् सर्वाभ्यां सर्वेभ्यः सर्वस्य सर्वयोः आमि सर्वनाम्नः सुट् अवर्णांता
त्सर्वनाम्नो विहितस्यामः सुडागमः एत्वषत्वे सर्वेषाम् सर्वस्मिन् शेषं रामवत् एवं विश्वादयोऽप्यदन्ताः संज्ञोपसर्जनीभूतास्तु
न सर्वादयः सर्वो नाम कश्चित्तस्मै सर्वाय देहि अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय उभशब्दो नित्यं द्विवचनान्तः
उभौ २ उभाभ्यां ३ उभयोः २ तस्येह पाठोऽकजर्थः डतरडतमौ प्रत्ययौ प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः ॥

नेम इत्यर्धे समः सर्वपर्यायः तुल्यपर्यायस्तु नेह यथासंख्यमनुदेशः समानामिति ज्ञापकात्॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्था-
यामसंज्ञायां एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात् सर्वत्र या प्राप्ता सा जसि वा स्यात् पूर्वे पूर्वाः स्वाभिधेया-
पेक्षावधिनियमो व्यवस्था व्यवस्थायां किम् दक्षिणा गाथकाः कुशला इत्यर्थः असंज्ञायां किम् उत्तराः कुरवः स्वमज्ञाति-
धनाख्यायां॥ ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्वे स्वाः आत्मीया आत्मान इति वा ज्ञातिधनवाचिनस्तु
स्वाः ज्ञातयोऽर्था वा॥ अन्तरं बहिर्योगोपसंव्यानयोः॥ बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा अन्तरे अन्त-
रा वा गृहाः बाह्या इत्यर्थः अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः॥ पूर्वादिभ्यो नवभ्यो वा एभ्यो ङसिङ्योः स्मात्स्मि-
नौ वा स्तः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवं परादीनामपि शेषं सर्ववत् तृतीयासमासे सर्वनामता न स्यात् मासपू-
र्वाय तृतीयासमासार्थवाक्येऽपि न मासेन पूर्वाय द्वन्द्वे च॥ उक्तसंज्ञा न वर्णाश्रमेतराणाम्॥ विभाषा जसि॥ वर्णाश्र-
मेतरे वर्णाश्रमेतराः॥ प्रथमचरमतयाल्पार्धकतिपयनेमाश्च एते जसि उक्तसंज्ञा वा स्युः प्रथमे प्रथमाः तयः प्रत्ययः द्वित-
ये द्वितयाः शेषं रामवत् नेमे नेमाः शेषं सर्ववत्॥ तीयस्य ङित्सु वा द्वितीयस्मै द्वितीयायेत्यादि एवं तृतीयः निर्जरः॥
जराया जरसन्यतरस्यां॥ जराया जरस् वा अजादौ विभक्तौ पदाङ्गाधिकारे तस्य तदन्तस्य च ग्रहणं अनेकाल्त्वात् सर्वादेशः
इति प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस् निर्जरसौ निर्जरसः उपजीव्य-
विरोधात् जरस् निर्जरैः इत्यादि पक्षे हलादौ च रामवत् विश्वपाः दीर्घाज्जसि च॥ दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो
न विश्वपौ विश्वपाः विश्वपां विश्वपौ॥ सुडनपुंसकस्य स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य॥
स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य॥ स्वादिष्वसर्वनामस्थाने कप्प्रत्ययावधिषु स्वादिष्वसर्वनाम-
स्थानेषु परेषु पूर्वं पदसंज्ञं स्यात् यचि भम् यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् आकडा-
रादेका संज्ञा॥ इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्राक् एकस्यैकैव संज्ञा ज्ञेया या परानवकाशा च॥ आतो धातोः आका-
रान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः॥ अलोऽन्त्यस्य विश्वपः विश्वपा विश्वपाभ्यां विश्वपाभिः इत्यादि एवं शङ्ख-

ध्मादयः ध्मातेः किम् हाहाः हाहौ हाहाः। हाहान्। अकः सवर्णे दीर्घः। हाहा हाहाभ्यां हाहाभिः। वृद्धिरेचि। हाहै। अकः सवर्णे
दीर्घः हाहाम्। आद्गुणः। हाहे हाहोः हाहासु। हरिः। प्रथमयोः पूर्वसवर्णः। हरी। जसि च। ह्रस्वान्तस्यांगस्य गुणः। हरयः। ह्र-
स्वस्य गुणः संबुद्धौ। हे हरे हरिं हरी हरीन्। शेषो घ्यसखि। शेष इति स्पष्टार्थं ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
आङो नाऽस्त्रियाम्। घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा। हरिणा हरिभ्यां हरिभिः। घेर्ङिति। घिसंज्ञकस्य ङिति सु-
पि गुणः। हरये हरिभ्यां गुणे कृते। ङसिङसोश्च। एङो ङसिङसोः अति पूर्वरूपमेकादेशः। हरेः हरिभ्यां हरिभ्यः हरेः ह-
र्योः हरीणाम्। अच्च घेः। इदुद्भ्यामुत्तरस्य ङेरौत् घेरत्। वृद्धिरेचि। हरौ हर्योः हरिषु ७ एवं कव्यादयः। अनङ् सौ। सख्यु-
रंगस्यानङादेशः असंबुद्धौ सौ। अलोऽन्त्यात्पूर्व उपधा। अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। सर्वनामस्थाने चाऽसं-
बुद्धौ। नान्तस्योपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने। अपृक्त एकाल्प्रत्ययः। एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्।
हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसि इत्येतदपृक्तं हल्लुप्यते। प्रत्यय-
लोपे प्रत्ययलक्षणम्। प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात्। नलोपः प्रातिपदिकान्तस्य। प्रातिपदिकसंज्ञकं यत्पदं तदन्त-
स्य नस्य लोपः स्यात्। सखा। सख्युरसंबुद्धौ। सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्। अचो ञ्णिति। अजन्तां-
गस्य वृद्धिर्ञिति णिति च। सखायौ सखायः। हे सखे। सखायं सखायौ सखीन्। सख्या सखिभ्यां सखिभिः। सख्ये सखि-
भ्यां सखिभ्यः। ख्यत्यात्परस्य। खितिशतीभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः। सख्युः सखिभ्यां
सखिभ्यः सख्युः सख्योः सखीनां। औत्। इतः अनः परस्य ङेरौत्। सख्यौ। शेषं हरिवत्। पतिः समास एव। घिसंज्ञः। पत्या
पत्ये पत्युः पत्युः पत्यौ। शेषं हरिवत्। समासे तु भूपतये। कति बहुवचनान्तः। बहुगणवतुडति संख्या। डति च। डत्य-
न्ता संख्या षट्संज्ञा स्यात्। षड्भ्यो लुक्। जश्शसोः। षड्भ्यः परयोः जश्शसोर्लुक् स्यात्। प्रत्ययस्य लुक्श्लुलुपः। लुक्श्लु-
लुपशब्दैः कृतं प्रत्ययादर्शनं क्रमात् तत्तत्संज्ञं स्यात्। जसि चेति गुणे प्राप्ते। न लुमताऽङ्गस्य। लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं

णेन स्यात् कति २ कतिभिः कतिभ्यः २ कतीनां कतिषु युष्मदस्मत्षट्संज्ञकाः त्रिषु सरूपाः त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेस्त्रयः
आमि त्रयाणां त्रिषु गौणत्वेऽपि प्रियत्रयाणां। त्यदादीनामः। एषामः स्याद्विभक्तौ द्विपर्यन्तानामेवेष्टिः द्वौ २ द्वाभ्यां ३ द्वयोः २
पाति लोकमिति पपीः सूर्यः। पप्यौ पप्यः पपीं पप्यौ पपीन् पप्या पपीभ्यां ३ पपीभिः पप्ये पपीभ्यः पप्योः पप्यां पपी प
प्योः पपीषु। एवं वातप्रम्यादयः। बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी। यू स्त्र्याख्यौ नदी। ईदूदन्तौ नित्यस्त्रीलिंगौ नदीसंज्ञौ
स्तः। प्रथमलिंगग्रहणं च पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः। अम्बार्थनद्योर्ह्रस्वः। अम्बार्थानां नद्यन्तानां
च ह्रस्वः स्यात्संबुद्धौ परे। हे बहुश्रेयसि। आण्नद्याः। नद्यन्तात्परेषां ङितामाडागमः स्यात्। आटश्च। आटोऽचि परे वृद्धिरे
कादेशः। बहुश्रेयस्यै बहुश्रेयस्याः २ बहुश्रेयसीनां। ङेराम्नद्याम्नीभ्यः। नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् स्यात्। बहु
श्रेयस्यां शेषं पपीवत्। अतिलक्ष्मीः शेषं बहुश्रेयसीवत्। प्रधीः। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। श्नुप्रत्ययान्तस्य धातो
रिवर्णोवर्णान्तस्य भ्रु इत्यस्य च इयङुवङौ स्तः अजादौ प्रत्यये। इति प्राप्ते। एरनेकाचोऽसंयोगपूर्वस्य। धात्ववयवसंयोगपूर्वो न
भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणादेशोऽजादौ प्रत्यये स्यात्। संयोगपूर्वस्य किं सुश्रियौ यवक्रियौ। प्र
ध्यौ प्रध्यः। अमि शसि च। प्रध्यं प्रध्यौ प्रध्यः प्रध्या प्रधीभ्यां प्रधीभिः प्रध्ये प्रधीभ्यः २ प्रध्योः प्रध्यां प्रध्यि शेषं पपीवत्। एवं ग्रा
मणीः। ङौ तु ग्रामण्यां। गतिश्च। प्रादयः। क्रियायोगे गतिसंज्ञाः स्युः। गतिकारकेतरपूर्वपदस्य यणं नेष्यते। शुद्धधियौ। न भूं
सुधियोः। एतयोरचि सुपि यण्न। सुधियौ सुधियः। अमि शसि च परत्वादियङ्। सुधियं सुधियौ सुधियः। सुधियां इत्यादि। सुखमिच्छ
तीति सुखीः। सुख्यौ सुख्यः। सुतीः सुत्यौ सुत्यः। शेषं प्रधीवत्। शंभुर्हरिवत्। एवं भान्वादयः। तृज्वत्क्रोष्टुः। असंबुद्धौ सर्वनाम
स्थाने क्रोष्टुशब्दस्य क्रोष्टृप्रयोगः कार्य इत्यर्थः। ऋतो ङिसर्वनामस्थानयोः। ऋदन्ताङ्गस्य गुणः ङौ सर्वनामस्थाने च। इति प्राप्ते
ऋदुशनस्पुरुदंसोऽनेहसां च। ऋदन्तानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहो
तृपोतृप्रशास्तॄणाम्। एषामुपधाया दीर्घः संबुद्धौ सर्वनामस्थाने। क्रोष्टा क्रोष्टारौ क्रोष्टारः। ह्रस्वस्य गुणः। हे क्रोष्टो हे क्रोष्टारौ हे क्रोष्टारः
क्रोष्टारं क्रोष्टारौ। प्रथमयोः पूर्वसवर्णः। तस्माच्छसो नः पुंसि क्रोष्टून्।

विभाषा तृतीयादिष्वचि॥ अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्॥ शेषो घ्यसखि॥ आङो नाऽस्त्रियाम्॥ क्रोष्टुना क्रोष्ट्रा क्रो-
ष्टुभ्यां क्रोष्टुभिः क्रोष्ट्रे। घेर्ङिति। एवं यथायथं। क्रोष्टवे क्रोष्ट्रे क्रोष्टुभ्यां क्रोष्टुभ्यः॥ ऋत उत्॥ ऋतः ङसिङसोरिति उकार एका-
देशः॥ रात्सस्य॥ रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य॥ क्रोष्टुः क्रोष्टोः क्रोष्टुभ्यां क्रोष्टुभ्यः क्रोष्टुः क्रोष्टोः॥ इको
यणचि। क्रोष्ट्रोः क्रोष्ट्रोः। नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ह्रस्वनद्यापो नुट्। नामि क्रोष्टूनां क्रोष्टरि
अच्च घेः। इदुतोरत्। क्रोष्टौ पक्षे हलादौ च शंभुवत्। हूहूः हूह्वौ हूह्वः इत्यादि। अतिचमूशब्दे तु नदीकार्यं विशे-
षः। हे अतिचमु। अतिचम्वः। प्रथमयोरिति प्राप्ते दीर्घाज्जसि च इति निषेधः॥ इको यणचि इति। अतिचम्वौ अतिचम्वः
अतिचम्वं अतिचम्वौ॥ इको यणचि इति प्राप्ते प्रथमयोः पूर्वसवर्णः॥ अमि पूर्वः। अतिचमूं अतिचमून्। अतिचम्वा अतिच-
मूभिः॥ इको यणचि। आण्नद्याः। आट् स्यात्॥ अतिचम्वै अतिचम्वाः २ अतिचमूनां अतिचम्वां। खलपूः॥ ओः सुपि॥ धात्व-
वयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि सुपि। खलप्वौ खलप्वः।
एवं सुल्वादयः। सुष्ठु लुनातीति सुलूः। स्वभवतीति स्वभूः॥ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। यणोऽपवादौ सुपि यण् प्राप्तयो-
रपि स्वपि न यण्। स्वभुवः। वर्षाभ्वश्च॥ अस्य यण् स्यादचि सुपि। वर्षाभ्वौ इत्यादि। दृन्भूः दृन्करपुनः पूर्वस्य भुवो यण्
वक्तव्यः। दृन्भ्वौ। एवं करभूः पुनर्भूः। धाता॥ ऋदुशनस्पुरुदंसोऽनेहसां च॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृ-
होतृपोतृप्रशास्तॄणां उपधाया दीर्घो॥ नलोपः प्रातिपदिकान्तस्य इति नकारलोपः स्यात्। धाता। हे धातः। धाता-
रौ धातारः॥ ऋवर्णान्नस्य णत्वं वाच्यम्॥ धातॄणाम्। एवं नप्त्रादयः॥ नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं॥ उणादीनां
तु व्युत्पन्नत्वाचेत् हि नप्त्रादीनामेव तेनेह न। पिता पितरौ पितरः पितरं शेषं धातृवत्। एवं जामातृभ्रात्रादयः। ना नरौ नरः।
नृ च॥ अस्य नामि वा दीर्घः। नृणां नॄणां॥ गोतो णित्॥ ओकाराद्विहितं सर्वनामस्थानं णिद्वत्। गौः गावौ गावः॥

वार्यलि० कौ० हे ५

ॐ. ओतोम्शसोः आ ओत इति छेदः ओदन्तादम्शसोरचि आकारः प्रकारादेशः स्यात् गाम् गावौ गाः गवा गोभ्यां गोभिः
गवे गोः इत्यादि। रायो हलि अस्याकारादेशो हलि विभक्तौ राः रायौ रायः राभ्यामित्यादि ग्लौः ग्लावौ ग्लावः ग्लौभ्या
मित्यादि। इत्यजन्ताः पुल्लिंगाः। रमा औङ आपः आबन्तादङ्गादौङः शी स्यात् औङिति औकारविभक्तेः संज्ञा रमे रमाः ॥
संबुद्धौ च। आप एकारः हे रमे हे रमे हे रमाः रमाम् रमे रमाः। आङि चापः। आङि ओसि चाप एकारः रमया रमाभ्यां रमा
भिः। याडापः। आपो ङितो याट् वृद्धिः रमायै रमाभ्यां रमाभ्यः रमायाः २ रमयोः रमाणाम् रमायाम् रमयोः रमासु ॥ एवं दु
र्गाम्बिकादयः सर्वा सर्वे सर्वाः सर्वनाम्नः स्याड्ढ्रस्वश्च आबन्तात्सर्वनाम्नो ङितः स्याट् स्यादापश्च ह्रस्वः सर्वस्यै सर्वाभ्यां
सर्वाभ्यः सर्वस्याः २ सर्वासाम् शेषं रमावत् एवं विश्वादय आबन्ताः विभाषा दिक्समासे बहुव्रीहौ सर्वनामता वा
ह्रस्वश्चावयोर्दीर्घान्तनिमित्तके हल् उत्तरपूर्वा औङ आपः उत्तरपूर्वे प्रथमयोः पूर्वसवर्णः उत्तरपूर्वाः अमि पूर्वः
उत्तरपूर्वाम् उत्तरपूर्वे उत्तरपूर्वाः आङि चापः उत्तरपूर्वया सर्वनाम्नः स्याड्ढ्रस्वश्च वृद्धिः उत्तरपूर्वस्यै याडापः ॥
आटश्च उत्तरपूर्वायै उत्तरपूर्वाभ्याम् उत्तरपूर्वाभ्यः उत्तरपूर्वस्याः उत्तरपूर्वायाः २ उत्तरपूर्वयोः उत्तरपूर्वासाम्
उत्तरपूर्वाणाम् उत्तरपूर्वस्याम् उत्तरपूर्वायाम् उत्तरपूर्वासु तृतीयस्य ङित्सु वा संज्ञा द्वितीयस्यै द्वितीयायै एवं तृ
तीया अम्बार्थनद्योर्ह्रस्वः हे अम्ब हे अक्क हे अल्ल असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न हे अम्बाडे हे अम्बाले हे अम्बि
के जरा जरसौ जरे इत्यादि पक्षे रमावत् गोपा विश्वपावत् मतिः ङिति ह्रस्वश्च इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नि
त्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति मत्यै मतये मत्याः मतेः २ इदुद्भ्यां नदीसंज्ञ
काभ्यामिङ् ङ्याप् स्याडाम् मत्याम् मतौ शेषं हरिवत् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोरे
तयोः तौ स्तो विभक्तौ अचि रऋतः। तिसृचतस्रोर्ऋतो रादेशः अचि। नुणदीर्घौ नामामपवादः तिस्रः २ तिसृभिः ॥

आमि नुट् नतिसृचतसृ एतयोर्नामि न दीर्घः तिसृणाम् तिसृषु द्वे २ द्वाभ्याम् ३ द्वयोः गौरी गौर्यौ गौर्यः हे गौ
रि गौर्या इत्यादि एवं नद्यादयः लक्ष्मीः शेषं नदीवत् एवं तरीतन्त्र्यादयः स्त्री हे स्त्रि स्त्रियाः अस्येयङ् ङ्यादौ प्रत्यये
परे स्त्रियौ स्त्रियः वाम् शसोः स्त्रिया इयङ् वा अमि शसि च परे स्त्रियम् स्त्रीम् स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियः
परत्वान्नुट् स्त्रीणाम् स्त्रीषु श्रीः श्रियौ श्रियः श्रियम् श्रियौ श्रियः श्रिया । नेयङुवङ्स्थानावस्त्री । इयङुवङ्ौ स्थि
तिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री हे श्रीः ङिति ह्रस्वश्च श्रियै श्रिये श्रियाः श्रियः । वामि । इयङुवङ्स्था
नौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री श्रीणाम् श्रियाम् श्रियि श्रियाम् धेनुर्मतिवत् धेनुः धेनू धेनवः
धेनुम् धेनू धेनूः धेन्वा धेनुभ्याम् धेनुभिः धेनवे धेन्वै धेनुभ्याम् धेनुभ्यः धेन्वाः धेनोः धेन्वा धेनौ स्त्रियाञ्च क्रो
ष्टोः क्रोष्टुस्तृज्वद्रूपं लभते अन्नेभ्योङीप् ऋन्नेभ्यो ङीप् स्त्रियां ङीप् क्रोष्ट्री गौरीवत् वधूः गौरीवत् भ्रू
श्रीवत् स्वयम्भूः धेनुवत् । न षट्स्वस्रादिभ्यः पञ्च चतस्रः स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा याता
मातेति सप्तैते स्वस्रादय उदाहृताः स्वसा स्वसारौ शेषं धातृवत् मातापितृवत् शामिमातृः द्यौः गोवत् रा पुंवत् नौः
ग्लौवत् ॥ इत्यजन्ताः स्त्रीलिङ्गाः अतोम् अतोऽम् क्लीबात्स्वमोर्म् ज्ञानं एङ्ह्रस्वात्सम्बुद्धेः इति हल्लोपः हे ज्ञान नपुंस
काच्च क्लीबादौङः शी भसंज्ञायां यस्येति च ईकारे तद्धिते च परे भस्य वर्णावर्णयोर्लोपः इत्यलोपे प्राप्ते औङः श्याम्प्र
तिषेधो वाच्यः ज्ञाने जश्शसोः शिः क्लीबात् शि सर्वनामस्थानं नपुंसकस्य झलचः शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात् नपुंस
कस्य झलचः झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने मिदचोऽन्त्यात्परः अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवा
न्तावयवो मित्स्यात् उपधादीर्घः ज्ञानानि पुनस्तद्वत् शेषं रामवत् एवं धनादयः अद्ड्डतरादिभ्यः पञ्चभ्यः क्लीबे
भ्यः स्वमोरद्डादेशः टेः डिति भस्य टेर्लोपः कतरत् कतरद् कतरे कतराणि हे कतरत् शेषं पुंवत् कतमत् इतरत् ॥

'एकत'

अन्यत् अन्यतरत् अन्यतमत् अन्यतममित्येव एकतरात्प्रतिषेधो वक्तव्यः एकतरं ह्रस्वो नपुंसके प्रातिपदिकस्य अजं
तस्य प्रातिपदिकस्य ह्रस्वः स्यात् श्रीपं ज्ञानवत् स्वमोर्नपुंसकात्लुक् वारि इकोऽचि विभक्तौ। इगन्तस्य क्लीबस्य नुमचि वि भ
क्तौ वारिणी वारीणि न लुमताङ्गस्य निमित्तात्तत्संबुद्धिनिमित्तो गुणः हे वारि हे वारे घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्व
तृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन वारिणे वारिणः वारिणोः नुमचिरतृज्वद्भावेभ्यो नुट् वारीणां वारिणि हलादौ हरिवत्
अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः टादावचि अल्लोपोऽनः अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याक
रस्य लोपः दध्ना दध्ने दध्नः दध्नोः २। विभाषा ङिश्योः अङ्गावयवोऽजादिस्वादिप्रत्ययपरो योऽन् तस्याकारस्य लोपो वा ङिश्योः
दध्नि दधनि शेषं वारिवत् एवमस्थिसक्थ्यक्षि सुधि सुधिनी सुधीनि हे सुधे हे सुधि तृतीयादिषु भाषितपुंस्कं पुंवद्
गालवस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवट्टादावचि सुधिया सुधिनेत्यादि मधु मधुनी मधूनि हे मधो
हे मधु एवमम्ब्वादयः सत्त सत्तनी सत्तूनि सत्त्वा सत्तनेत्यादि धातृ धातृणी धातॄणि हे धातः हे धातृ तथा ज्ञातृ ज्ञातृणा ए
वं ज्ञात्रादयः एचः इग्घ्रस्वादेशे प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युनेत्यादि प्ररि प्ररिणी प्ररीणि प्ररिणा एकदेशविकृतमनन्य
वत् प्रराभ्यां प्ररीणां सुनु सुनुनी सुनूनि सुनुनेत्यादि॥ इत्यजन्ता नपुंसकलिङ्गाः॥ हो ढः झलि पदान्ते च लिट् लिड् लिहौ
लिहः लिहा लिड्भ्यां लिट्सु लिट्त्सु दादेर्धातोर्घः झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः एकाचो बशो भष् झषन्तस्य स्ध्वोः
धात्ववयवस्यैकाचो झषन्तस्य बशो भष् से ध्वे पदान्ते च धुक् धुग् दुहौ दुहः दुहा धुग्भ्यां धुक्षु वा द्रुहमुहष्णुहष्णिहां एषां हस्य
वा घः झलि पदान्ते च ध्रुक् ध्रुग् ध्रुट् ध्रुड् द्रुहौ द्रुहः ध्रुग्भ्यां ध्रुड्भ्यां ध्रुक्षु ध्रुट्सु ध्रुट्त्सु एवं मुक् मुग् मुट् मुड् स्नुक् स्नुग् स्नुट् स्नुड् एवं स्निक् इग्यणः संप्रसारणं य
णः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् वाह ऊठ् भस्य वाहः संप्रसारणमूठ् संप्रसारणाच्च संप्रसारणादचि पूर्व
रूपमेकादेशः वृद्धिः विश्वौहः विश्वौहे इत्यादि चतुरनडुहोराम्उदात्तः सर्वनामस्थाने सावनडुहः नुम् स्यात् अनड्वान्
अम् संबुद्धौ हे अनड्वन् अनड्वाहौ अनड्वाहः वसुस्रंसुध्वंस्वनडुहां दः सान्तवस्वन्तस्य स्रंसादेश्च दः पदान्ते
अनडुद्भ्यां पदान्तार्किं स्रस्त महः साडः सः साड्रूपस्य सहेः सस्य मूर्धन्यादेशः तुराषाट् तुराषाड् तुरासाहौ तुरासाहः इत्यादि दिव औत्

दिविति मातिपदिकस्यान्तस्य स्याद्यौः सुदिवौ दिव उत् पदान्ते सुद्युभ्याम् इत्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ षट्चतुर्भ्यश्च
षट्भ्यः आमो नुडागमः। रषाभ्यां नो णः समानपदे चतुर्णाम्। रोः सुपि रोरेव विसर्गः सुपि चतुर्षु। मो नो धा
तोः पदान्ते प्रशान् प्रशामौ प्रशान्भ्याम्। किमः कः विभक्तौ कः कौ के इत्यादि सर्ववत्। इदमो मः। सौ त्यदाद्यत्वापवा
दः। इदोय् पुंसि। इदम इदोय् सौ पुंसि अयं त्यदाद्यत्वे अतो गुणे अपदान्तादतो गुणे पररूपमेकादेशः दश्च इदमो
दस्य मः स्यादि विभक्तौ इमौ इमे त्यदादेः संबोधनं नास्तीत्युत्सर्गः अनाप्यकः। अककारस्य इदम इदोऽना विभ
क्तौ आ विति प्रत्याहारः अनेन। हलि लोपः अककारस्य इदम इदो लोपः आपि हलादौ नानर्थकेऽलोन्त्यविधिरन
भ्यासविकारे आद्यन्तवदेकस्मिन् एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात् सुपि चेति दीर्घः आभ्यां
नेदमदसोरकोः अककारयोरिदमदसोर्भिस ऐस् न एभिः अस्मै एभ्यः अस्मात् अस्य अनयोः २ एषाम् अस्मिन्
एषु द्वितीयाटौस्स्वेनः इदमेतदोरन्वादेशे किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादे
शः यथानेन व्याकरणमधीतमेनं छन्दोऽध्यापय अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति एनं एनौ एनान्
एनेन एनयोः राजा न ङिसंबुद्ध्योः नस्य लोपो न ङौ संबुद्धौ च हे राजन् परमे व्योमन् ङावुत्तरपदे प्रतिषेधः ब्रह्म
निष्ठः राजानौ राजानः राजानं राज्ञः नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति सुब्विधौ स्वरविधौ संज्ञाविधौ कृ
ति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र राजाश्व इत्यादौ इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न राजभ्याम् राज्ञि राजनि य
ज्वा यज्वानौ यज्वानः न संयोगाद्वमन्तात्। वमन्तात्संयोगादनोकारस्य लोपो न यज्वनः यज्वभ्याम् ब्रह्मा ब्रह्माणौ
ब्रह्माणः ब्रह्माणौ ब्रह्मणः ब्रह्मणा। इन्हन्पूषार्यम्णां शौ। एषामुपधाया दीर्घः सौ च इन्नादीनामुपधाया दी
र्घः असंबुद्धौ सौ वृत्रहा हे वृत्रहन्। एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्ता

ॐ· न्यरस्य माति यदि कांत नुम्विभक्तिस्थस्य नस्य णः वृत्रहणौ हो हंतेर्ञ्णिन्नेषु ञ्णिति णिति नेपरे च हंतेर्हस्य कुत्वं
हंतेरत्पूर्वस्य हंतेरकारस्य पूर्वस्यैव नस्य णो नान्यस्य वृत्रघ्नः वृत्रघ्ना वृत्रहभ्यां वृत्रघ्नि वृत्रहणि इत्यादि एवं शार्ङ्गिन्
यशस्विन्नर्यमन्पूषन् पूषा पूषणौ इन्हन्पूषार्यम्णां शौ पूष्णः पूषभ्यां पूष्णि पूषणि मघवा बहुलं मघवन्शब्दस्य वा
तृ इत्यन्तादेशः ऋ इत् नाद्यं वेथकृत्तमनेकालत्वं उगिदचां सर्वनामस्थानेऽधातोः अधातोरुगितो नलोपिनो
ञ्चतेश्च नुम् स्यात्सर्वनामस्थाने मघवान् मघवन्तौ मघवन्तः हे मघवन् मघवन्तं मघवतः मघवद्भ्यां तृत्वाभा-
वे मघवा सुटि राजवत् श्वयुवमघोनामतद्धिते अन्नन्तानां भानामेषामतद्धिते परे संप्रसारणं स्यात् मघोनः
मघवभ्यां एवं श्वा युवा शुनः यूनः २ यूना युवभ्यां अर्वा हे अर्वन् अर्वणस्त्रसावनञः नञा रहितस्यार्वन्नित्यस्याङ्ग-
स्य तृ इत्यन्तादेशो न तु सौ उगित्वान्नुम् अर्वन्तौ अर्वद्भ्यां पथिमथ्यृभुक्षामात् एषामाकारोऽन्तादेशः स्यात् इतोऽत्सर्वना-
मस्थाने पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने थो न्थः पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने पन्थाः प-
न्थानौ पन्थानः भस्य टेर्लोपः भस्य पथ्यादेः टेर्लोपः पथः पथिभ्यां एवं मन्थाः ऋभुक्षाः ष्णान्ता षट् ष्णान्ता नान्ता च सं-
ख्या षट्संज्ञा स्यात् पंच पंचभ्यः नुट् नोपधायाः नान्तस्योपधाया दीर्घो नामि पंचानां पंचसु अष्टन आ विभक्तौ
हलादौ वा स्यात् अष्टाभ्य औश् कृताकारादष्टनो जश्शसोरौश् अष्टभ्यः इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्वि-
षये आत्वं ज्ञापयति अष्टौ अष्टाभिः अष्टाभ्यः २ अष्टानां अष्टासु आत्वाभावे अष्ट पंचवत् ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजि-
क्रुंचां च एभ्यः किन् स्यात् अचेः सुप्युपपदे युजिक्रुंचोः केवलयोः क्रुंचेर्नलोपाभावो निपात्यते अन्यथा नापि कारनिर्देशः क्विन्प्रत्ययः
कुः क्विन्प्रत्ययस्य कुः वेरपृक्तस्य लोपः अपृक्तस्य वस्य लोपः किमन्तस्य पदस्य कुः क्विन्प्रत्ययो यस्मात्तस्य पदान्ते कुः स्यात् ऋत्विक् ऋत्विजौ ॥
ऋत्विग्भ्यां युजेरसमासे युजेः सर्वनामस्थाने नुम् स्यादसमासे संयोगान्तस्य लोपः संयोगान्तस्य लोपः कुत्वेन नस्य ङः युङ् युञ्जौ युञ्जः युग्भ्यां असमासे किं
चोः कुः चवर्गस्य कवर्गः स्यात् झलि पदान्ते च सुयुक् सुयुजौ सुयुग्भ्यां

निमित्ताभावे नैमित्तिकस्याप्यभावः त्वत् त्वन्तौ त्वन्तः ॥ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः झलि पदान्ते
च जश्त्वं राट् राड् राजौ राजः एवं विभ्राट् देवेट् देवेजौ विश्वसृट् परिमृट् परौ व्रजेः षः पदान्ते परावुपदे व्रजेः
क्विप् स्याद्दीर्घश्च पदान्ते षत्वमपि परिव्राट् परिव्राजौ विश्वस्य वसुराटोः विश्वस्य दीर्घत्वं वसौ राटि च परे विश्वाराट् एवं
इति पदान्ते लोप लक्षणार्थं चत्वं समस्य विवृत्तिते विश्वाराजौ विश्वाराजः स्कोः संयोगाद्योरन्ते च पदान्ते झलि परे यः संयो
गान्तस्तस्य यः सकारो लोपः भ्रस्ज भृट् भृड् समस्तपुंसि नपुंसः कत्वाजस्य काशी इति भ्रस्जः भृज्जौ भृज्जः त्यदाद्यत्वे पर
रूपत्वे तदोः सः सावनन्त्ययोः त्यदादीनां तदन्तयोरनन्त्ययोः सः स्यात् सौ सः त्यौ त्यः तौ ते यः यौ ये एषः एतौ एते इत्या
दि प्रथमयोरम् युष्मदस्मद्भ्यां परस्य ङेः प्रथमाद्वितीययोरमादेशः त्वाहौ सौ अनयोर्मपर्यन्तस्य त्वाहादेशौ
स्तः सौ परे लोपः आन्त्यस्य निमित्ते विभक्तौ परतः एतयोष्टेर्लोपः त्वमहं युवावौ द्विवचने द्वयोः अनयोर्मप
र्यन्तयोर्युवावौ स्तो विभक्तौ प्रथमायाश्च द्विवचने भाषायां औङ् एतयोरात्वं लोके युवां आवां यूयवयौ जसि अन
योर्मपर्यन्तस्य यूयवयौ स्तः यूयं वयं त्वमावेकवचने एकस्यार्थावनयोर्मपर्यन्तयोस्त्वमौ स्तः द्वितीयायां च अन
योरात्स्यात् त्वां मां युवां आवां शसो नः आभ्यां शसो नः स्यात् अमोऽपवादः आदेः परस्य संयोगान्तस्य लोपः युष्मान् अ
स्मान् योऽचि अनयोर्यादेशोऽनादेशे आदौ विभक्तौ त्वया मया युष्मदस्मदोरनादेशे अनयोरात्स्यात् अनादेशे ह
लादौ विभक्तौ युवाभ्यां आवाभ्यां २ युष्माभिः अस्माभिः तुभ्यमह्यौ ङयि अनयोर्मपर्यन्तयोस्तौ स्तः तुभ्यं मह्यं
भ्यसोऽभ्यम् आभ्यां परस्य युष्मभ्यं अस्मभ्यं एकवचनस्य च आभ्यां ङसेरत् त्वत् मत् पंचम्या अत् आभ्यां परस्य भ्य
सोऽत्स्यात् युष्मत् अस्मत् अनयोर्मपर्यन्तस्य युष्मदस्मद्भ्यां ङसोऽश् तव मम युवयोः आवयोः साम आकं आभ्यां
साम आकं स्यात् युष्माकं अस्माकं त्वयि मयि युष्मासु अस्मासु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ

पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनौ एतावादेशौ स्तः बहुवचनस्य वस्नसौ उक्तविधयोः
रनयोः षष्ठ्या वचनांतयोर्वस्नसौ स्तः तेमयावेकवचनस्य उक्तविधयोः षष्ठीचतुर्थ्येकवचनांतयोस्तेमे एतौ स्तः
त्वामौ द्वितीयायाः द्वितीयैकवचनांतयोः त्वामा एतौ स्तः श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि
स हरिः पातु वामपि नौ विभुः। सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र
वः स नः २ एकवाक्ये युष्मदस्मदादेशा वक्तव्याः एकतिङ् वाक्यं तेनेह न ओदनं पच तव भविष्यति एते वांनावादय
आदेशा अनन्वादेशे वा वक्तव्याः अन्वादेशे तु नित्यं स्युः धाता ते भक्तोस्ति धाता तव भक्तोस्तीति वा तस्मै ते नमः इत्येव सुपा
त् सुपादौ पादः पत् पादशब्दांते यदंगं भं तदवयवस्य पादस्य पदादेशः सुपदः सुपाद्भ्यां अग्निमत् अनिदितां
हल उपधायाः क्ङिति हलंतानामनिदितामंगानामुपधाया नस्य लोपः किति ङिति नुम् संयोगांतस्य लोपः नस्य
कुत्वेन ङः प्राङ् प्राञ्चौ प्राञ्चः अचः लुप्तनकारस्यांचतेर्भस्याकारस्य लोपः चौ लुप्ताकारनकारेंचतौ परे पूर्वस्याणो
दीर्घः प्राचः प्राग्भ्यां प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रतीचः प्रत्यग्भ्यां उदङ् उदञ्चौ उद ईत् उच्छब्दात्परस्य लुप्तनकार
स्यांचतेर्भस्याकारस्य ईत् उदीचः उदग्भ्यां समः समिः वप्रत्ययांतेंचतौ सम्यङ् सम्यञ्चौ समीचः सम्यग्भ्यां सहस्य
सध्रितथा सध्र्यङ् तिरसस्तिर्यलोपे अलुप्ताकारेंचतौ वप्रत्ययांते तिरसस्तिर्यादेशः तिर्यङ् तिर्यञ्चौ तिर्यञ्चः
तिरश्चः तिरश्चाति तिर्यग्भ्यां नांचेः पूजायां पूजार्थस्यांचतेरुपधाया नस्य लोपो न प्राङ् प्राञ्चौ नलोपाभावादलो
पो न प्राञ्चः प्राङ्भ्यां प्राङ्क्षु एवं पूजार्थे प्रत्यङादयः क्रुङ् क्रुङ्भ्यां पयोमुक् पयोमुचौ पयोमुग्भ्यां महत्पूजायां
वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च एते निपात्यंते शतृवच्चैषां कार्यं स्यात् उगितां नुम् सांतमहतः संयोगस्य
सांतसंयोगस्य महतश्च यो नस्तस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने महान् महांतौ महांतः हे महन्

ओं ल॰ कौ॰ १०

महतः महता महद्भ्यां अत्वसंतस्य चाधातोः अत्वंतस्योपधाया दीर्घो धातुभिन्नासंतस्य चासंबुद्धौ सौ परे धीमंतु
मंवाथित्वावचनसामर्थ्यादादेो दीर्घः धीमान् धीमंतौ हे धीमन् शसादौ महद्वत् भातेर्डवतुः डित्वसामर्थ्यादभस्यापि
टिलोपः भवान् भवंतौ शत्रंतस्य तु भवन् उभे अभ्यस्तं षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तं सं
ज्ञे स्तः नाभ्यस्ताच्छतुः अभ्यस्ताच्छतुर्नुम् न ददत् ददतौ जक्षित्यादयः षट् धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः
स्युः जक्षत् जक्षतौ एवं जाग्रत् दरिद्रत् शासत् चकासत् दीध्यत् वेव्यत् गुप् गुब् गुपौ गुब्भ्यां त्यदादिषु दृशोऽना
लोचने कञ्च त्यदादिषूपपदेष्वज्ञानार्थाद्दृशेः कञ् चात् क्विन् आ सर्वनाम्नः दृग्दृशवतुषु सर्वनाम्न आकारोऽन्ता
देशः स्यात् दृग्दृशवतुषु परेषु तादृक् तादृग् तादृशौ तादृग्भ्यां व्रश्चेति षः जश् त्वचर्त्वे विट् विड् विशौ
विड्भ्यां विट्सु विट्त्सु नशेर्वा नशेः कवर्गोऽन्तादेशो वा पदान्ते नक् नग् नट् नड् नग्भ्यां नड्भ्यां ञ्णान्ते पूर्वे
णैनडः यः कः षात् डणक् नड्सु नट्त्सु स्पृशोऽनुदके क्विन् अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात् घृतस्पृक् घृ
तस्पृग् घृतस्पृशौ घृतस्पृग्भ्यां घृतस्पृक्षु दधृक् दधृग् दधृग्भ्यां दधृक्षु रत्नमुट् रत्नमुषौ रत्नमुषः रत्नमुड्भ्यां
रत्नमुट्सु रत्नमुट्त्सु षट् २ षड्भिः षड्भ्यः २ षण्णां षट्सु षट्त्सु रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रुरिति रु
त्वं वोरुपधाया दीर्घ इकः रेफवान्तस्य धातोरुपधाया इको दीर्घः पदान्ते पिपठीः पिपठिषौ पिपठीर्भ्यां नुम्
विसर्जनीयशर्व्यवायेऽपि एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः ष्टुत्वेन पूर्वस्य षत्वं पिप
ठीष्षु पिपठीःषु चिकीः चिकीर्षौ चिकीर्षु विद्वान् विद्वांसौ विद्वांसौ विद्वांसः हे विद्वन् वसोः संप्रसारणं वस्व
न्तस्य भस्य संप्रसारणं स्यात् विदुषः वसुस्रंसुध्वंस्वनडुहां दः विद्वद्भ्यां पुंसोऽसुङ् सर्वनामस्थाने पुमान् हे पुमन् पु
मांसौ पुंसः पुंभ्यां पुंसु ऋदुशनेत्यनङ् उशना उशनसौ अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः हे उशनन् ॥

ॐ॰ हे उशन हे उशनः उशनोभ्यां अनेहा अनेहसौ हे अनेहः वेधाः वेधसौ हे वेधः वेधोभ्यां अदसः डौ सुलोपश्च अ
दस डौ त्स्यात् सौ सुलोपश्च तदोः सिनिसः असौ डौत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः प्रतिषेधपक्षे सादुत्वेच
असकौ असुकः अदसोसेर्दादुदोमः अदसो दात्परस्य उहतोर्मात्दस्य मश्च आंतरतम्यात् ह्रस्वस्य ह्रस्वः दूदि उदी॥
र्घस्य ऊः अमू जसः शीः गुणः एत ईद्बहुवचने अदसो दात्परस्य एत ईत् बहुर्थेको अमी एवं ह्यसिद्धमिति वि
भक्तिकार्यं प्राक् पश्चादुत्वमत्वे अमुं अमू अमून् मुत्वे कृते घिसंज्ञायां नाभावः न मुने नाभावे कृते च
मुभावो नासिद्धः अमुना अमूभ्यां अमीभिः अमुष्मै अमीभ्यः अमुष्मात् अमुष्य अमुयोः अमीषां अमुष्मिन्
अमीषु ॥इति हलंताः पुल्लिंगाः॥ ॐ ॥ नहो धः नहो हकारस्य धः स्यात् झलि पदांते च नहिवृतिवृषिव्यधि
रुचिसहितनिषु क्कौ क्विबंतेषु पूर्वपदस्य दीर्घः उपानत् उपानहौ उपानहः उपानद्भ्यां उपानत्सु
उष्णिक् उष्णिहौ उष्णिग्भ्यां द्यौः दिवौ द्युभ्यां गीः गिरौ गिरः गीर्भ्यां गीर्षु पूः पुरौ पूर्भ्यां चतस्रः चतसृणां का।
केकाः सर्वावत् यः सौ इदमो दस्य यः सौ इदमोमः इयं त्यदाद्यत्वं पररूपत्वं टाप् दश्चेतिमः इमे इमाः इमां
इमे इमाः अनया हलि लोपः आभ्यां आभिः अस्यै अस्याः अनयोः आसां अस्यां अनयोः आसु स्रक् स्रजौ
स्रजः स्रग्भ्यां त्यदाद्यत्वं टाप् स्या त्ये त्याः वाक् वाचौ वाग्भ्यां अप् शब्दो नित्यं बहुवचनांतः अप्तृन्निति दीर्घः
आपः अपः अपोभि अपस्तकारो भादौ प्रत्यये अद्भिः अद्भ्यः अपां अप्सु दिक् दिशौ दिशः दिग्भ्यां त्यदादिष्विति दृशेः
क्विन्विधानादन्यत्रापि कुत्वं दृक् दृशौ दृग्भ्यां त्विट् त्विषौ त्विड्भ्यां ससजुषोरुरिति रुत्वं सजूः सजुषौ सजू
र्भ्यां आशीः आशिषौ आशीर्भ्यां असौ उत्वमत्वे अमू अमूः अमूं अमू अमुया अमूभ्यां २ अमूभिः अमुष्यै अमूभ्यः २
अमुष्याः अमुयोः २ अमूषां अमुष्यां अमूषु इति हलंताः स्त्रीलिंगाः स्वमोर्नपुंसके लुक् स्यात् न उहाभिते

ॐ ल कौ ११ ॥

स्वनडुत् स्वनडुही चतुरनडुहोरित्याम् स्वनड्वांहि पुनस्तद्वत् शेषं पुंवत् वाः वारी वारि वाः वार्भ्यां चत्वारि किं के
कानि इदं इमे इमानि ब्रह्म संबुद्धौ नपुंसकानां नलोपो वा वक्तव्यः हे ब्रह्म हे ब्रह्मन् ब्रह्मणी ब्रह्माणि रोसुपि
अहः विभाषा ङिश्योः अह्नी अहनी अहानि अहन् अहन्नित्यस्य रुः स्यात्पदांते अहोभ्यां दंडि दंडिनी दंडीनि स्वप दंडि ३
थि टिलोपः स्वपथी स्वपंथानि ऊर्क् ऊर्जी ऊर्न्ति नरजानां संयोगः त्यत् त्ये त्यानि तत् ते तानि यत् ये यानि एतत् एते
एतानि गवाक् गोची गवांचि पुनस्तद्वत् गोचा गवाग्भ्यां शकृत् शकृती शकृंति शकृद्भ्यां ददत् ददती वा न
पुंसकस्य अभ्यस्तात् क्लीबात् परस्य शतुर्वा नुम् सर्वनामस्थाने ददंति ददति तुदत् आच्छीनद्योर्नुम् अवर्णान्त
रोयः शतुरवयवस्तदंतांगस्य नुम् वा शीनद्योः तुदंती तुदती तुदंति भात् भांती भाती भांति पचत् शप्श्यनो
र्नित्यं शप्श्यनोरात्परो यः शतुरवयवस्तदंतस्य नुम् शीनद्योः पचंति दीव्यत् दीव्यंती दीव्यंति धनुः धनुषी
सांतेति दीर्घः नुम् विसर्जनीयेति षः धनूंषि धनुषा धनुर्भ्यां एवं चक्षुर्हविरादयः पयः पयसी पयांसि पय
सा पयोभ्यां सुपुम् सुपुंसी सुपुमांसि अदः विभक्तिकार्यं उत्वमत्वे अमू अमूनि शेषं पुंवत् इति हलंता
क्लीबाः स्वरादिनिपातमव्ययम् स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः स्वर् अंतर् प्रातर् सनुतर् उच्चैस्
शनैस् ऋथक् ऋते युगपत् आरात् पृथक् ह्यस् श्वस् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं बहि
स् अवस् समया निकषा स्वयं वृथा नक्तं नञ् हेतौ इद्धा अद्धा सामिवत् ब्राह्मणवत् क्षत्रियवत् सना स
नत् सनात् निरस् अंतरा अंतरेण ज्योक् कं शं सहसा विना नाना स्वस्ति स्वधा अलं वषट् श्रौषट् वौषट् अ
न्यत् अस्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या मुधा पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकं ॥
प्रवाहिका आर्यहलं अभीक्ष्णं साकं सार्धं नमस् हिरुक् धिक् अथ अम् आम् प्रताम् प्रशान् प्रमान् ॥

माङ्. आकृतिगणोयं च वा ह अह एव एवं नूनं शश्वत् युगपत् भूयस् सूपत् वत् कुवित् नेत्
चेत् चण् यत्र कच्चित् नह हंत माकिः नकिः माकी माङ् नञ् यावत् तावत् त्वैद्वैन्वै रै श्रौषट् स्वाहा
स्वधा वषट् तुम् तथाहि खलु किल अथ सुष्ठु स्म आदह उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं
अहंयुः अस्तिक्षीरा अआइई उऊएऐ ओऔ पशु शुकं यथाकथाच पाट्प्याट् अंग हैहे भोः अये द्य विषु
नाक्ष्ना एकपदे युत् आतः चादिरप्याकृतिगणः तद्धितश्चासर्वविभक्तिः यस्मात्सर्वा विभक्तिर्नोत्पद्यते
सतद्धितांतोव्ययंस्यात् परिगणनंकर्तव्यं तसिलादयः प्राक्पाशपः शस्प्रभृतयः प्राक् समासां
तेभ्यः अम् आम् कृत्वोर्थाः तसिवती नानाञाविति अ तः इत्यादि कृन्मेजंतः कृद्यो मांत एजंतश्च त
दंतमव्ययं स्मारंस्मारं जीवसेपिबध्यै क्त्वातोसुन्कसुनः एतदंतमव्ययं कृत्वा उदेतोः विसृपः
अव्ययीभावश्च अधिहरि अव्ययादाप्सुपः अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात् तत्रशालायां ॥
अथ सदृशं त्रिषुलिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्नव्येति तदव्ययं व ष्टिभागुरिरल्लो
पमवाप्योरुपसर्गयोः आपंचैव हलंतानां यथावाचानिशादिशा वगाहः अवगाहः पिधानं ॥
अपिधानं ॥ इ त्यव्ययानि ॥ ✻ ॥ ✻ ॥ ✻ ॥ इति श्रीमद्वरदराजविरचितायां लघुसि
द्धांतकौमुद्यां अव्यय पूर्वार्द्धः समाप्तः ॥ ✻ ॥ ✻ ॥ ॥ ✻ ॥ ✻ ॥ ✻ ॥

ल॰ कौ॰ १२ ॥

॥ लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एषु पंचमो लकारश्छन्दोमात्रगोचरः धातोरित्यधि-
कृत्य लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युः अकर्मकेभ्यो भावे
कर्त्तरि च वर्त्तमाने लट् वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात् अटावितौ उच्चारणसामर्थ्यान् लस्य नेत्वं भू सत्ता-
यां कर्त्तृविवक्षायां भू ल इति स्थिते तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आतां झ थास् आथां ध्वम् इट् वहि महिङ्
एतेऽष्टादश लादेशाः स्युः लः परस्मैपदं लादेशाः परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदं तङ् प्रत्याहारः शा-
नच् कानचौ चैतत्संज्ञाः स्युः पूर्वसंज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत उपदेशे यो ङित् तदंताच्च धा-
तोर्लः स्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञितश्च धातोरात्मनेपदं कर्तृ-
गामिनि क्रियाफले शेषात् कर्त्तरि परस्मैपदं आत्मनेपदनिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं स्यात् तिङस्त्री-
णि त्रीणि प्रथममध्यमोत्तमाः तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवच-
नबहुवचनान्येकशः लब्धप्रथमादिसंज्ञानि तिङ् त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः युष्मद्यु-
पपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङ् वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च
मध्यमः अस्मद्युत्तमः तथाभूतेऽस्मद्युत्तमः शेषे प्रथमः भू तिर् इति जाते तिङ्शित्सार्वधातुकं तिङः शितश्च
धात्वधिकारोक्ता एतत्संज्ञाः स्युः कर्त्तरि शप् कर्त्रर्थे सार्वधातुके परे धातोः शप् शपावितौ सार्वधातुका-
र्द्धधातुकयोः अनयोः परयोरिगन्ताङ्गस्य गुणः अवादेशः भवति भवतः झोऽन्तः प्रत्ययावयवस्य झस्यान्तादे-
शः अतो गुणे भवंति भवसि भवथः भवथ अतो दीर्घो यञि अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके भवामि
भवावः भवामः स भवति तौ भवतः ते भवंति त्वं भवसि युवां भवथः यूयं भवथ अहं भवामि आवां भवावः ॥